# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्

## सत्रान्तपरीक्षा – डिसेम्बर – २०१८

**कक्षा** – शास्त्रीतृतीयवर्षम् (SEM- 5) **प्रश्नपत्रम्** – ६ **गुणाः** - ७०

**विषयः** - साहित्यम् **कोड** – **CC 3.5.10.** **समयः** - १० तः ०१

**दिनाङ्कः** - १०/१२/२०१८ **सन्दर्भग्रन्थः** – कादम्बरी (महाश्वेतावृत्तान्तः)

---

### प्रथमान्वितिः (Unit-1)

**प्रश्नः – १ प्रदत्तेषु गद्यखण्डेषु द्वौ गद्यखण्डौ विवेचनीयौ।** **१०**

१) अथ कृतप्रणामायां मयि दुर्लङ्घ्यशासनतया मनोभुवः, मदजननतया च मधुमासस्य, अतिरमणीयतया च तस्य प्रदेशस्य, अविनयबहुलयता चाभिनवयौवनस्य, चञ्चल-प्रकृतितया चेन्द्रियाणाम्, दुर्निवारतया च विषयाभिलाषाणाम्, चपलतया च मनोवृत्तेः, तथा भवितव्यतया च तस्य तस्य वस्तुनः , किं बहुना मम मन्दभाग्यदौरात्म्यादस्य चेदृशस्य क्लेशस्य विहितत्वात्तमपि मद्विकारदर्शनापहतधैर्यं प्रदीपमिव पवनस्तरलतामनयदनङ्गः।

२) तेन च कर्णावतंसीकृता वसन्तदर्शनानन्दितायाः स्मितप्रभामिव वनश्रियः मलयमारुतागमनार्थं लाजाञ्जलिमिव मधुमासस्य , यौवनलीलामिव कुसुमलक्ष्म्याः सुरत-परिश्रमस्वेद-जलकण-जालकावलीमिव रतेः , ध्वजचिह्न-चामर-पिच्छिकामिव मनोभवगजस्य , मधुकर-कामुकाभिसारिकाम्, कृत्तिकातारास्तबकानुकारिणीम्, अमृतबिन्दुनिस्यन्दिनीम् , अदृष्टपूर्वां कुसुममञ्जरीमद्राक्षम्।

३) आसीच्च तस्य चेतसि –"नास्ति खल्वसाध्यं नाम तपसाम्। किमतः परमाश्चर्यम् यत्र व्यपगतचेतना अपि सचेतना इवास्यै भगवत्यै समतिसृजन्तः फलान्यात्मानुग्रहमुपपादयन्ति वनस्पतयः। चित्रमिदमालोकितमस्माभिरदृष्टपूर्वम्" इत्यधिकतरोपजातविस्मयश्चोत्थाय तमेव प्रदेशमिन्द्रायुधमानीय व्यपनीतपर्याणं नातिदूरे संयम्य निर्झरजलनिर्वर्तितस्नान-विधिस्तान्यमृतस्वादूनि उपभुज्य फलानि पीत्वा च तुषारशिशिरं प्रस्रवणजलमुपस्पृश्य चैकान्ते तावदवतस्थे, यावत्तयापि कन्यकया कृतो जल-फल-मूलमयेष्वाहारेषु प्रणयः।

**प्रश्नः – २ द्वयोरेकः प्रश्नः संसाध्यः।** **१०**

**१) "महाश्वेतायाः आत्मवृत्तान्तारम्भः" यथाग्रन्थं विवेचनीयः।**

**२) महाश्वेतादर्शने मुण्डरीकावस्थां प्रकटयत।**

### द्वितीयान्वितिः (Unit-2)

**प्रश्नः – ३ यथाभिमतं गद्यखण्डद्वयं वर्ण्यम्** **१०**

१. अपगतमिनेषेण चक्षुषा तदवस्थं चिरमुद्वीक्ष्य समुपजातविषादो वेपमानेन्हृदयेनाचिन्तयम् – " एवं नामायमतिदुर्विषहवेगो मकरकेतु , येनानेन क्षणेनायमीदृशमवस्थान्तरम् अप्रतीकारमुपनीतः। कथमेवमेकपदे व्यर्थीभवेदेवंविधो ज्ञानराशिः। अहो बत महच्चित्रम् !

तथा नामायमाशैशवाद्धीरप्रकृतिरस्खलितवृत्तिर्मम चान्येषाञ्च मुनिकुमारकाणां स्पृहणीयचरित: आसीत् । अत्र तु इतर इव परिभूय ज्ञानम्, अवगणय्य तप:प्रभावम् , उन्मूल्य गाम्भीर्यम् , मन्मथेन जडीकृत: । "सर्वथा दुर्लभं यौवनमस्खलितमिति' ।

२. तत्र च मार्ग-लता-कुसुम-रजोधूसरं चरणयुगलं कैलासतटाच्चन्द्रोदयप्रसृत – चन्द्रकान्तमणिप्रस्रवणे क्षालयन्ती यस्मिन् प्रदेशे स आस्ते तस्मिन्नेव चास्य सरस: पश्चिमे तटे पुरुषस्येव रुदितध्वनिं विप्रकर्षान्नातिव्यक्तम् उपालक्षयम् । दक्षिणेक्षास्फुरणेन च प्रथममेव मनस्याहितशङ्का तेन सुतरां विदीर्णह्रदयेव किमप्यनिष्टमन्त: कथयतेव विषण्णेनान्तरात्मना "तरलिके ! किमिदम्" इति सभयमभिदधाना वेपमानगात्रयष्टिस्तदभिमुखम् अतित्वरितमगच्छम् ।

३. अथ मुहूर्तादिव तं तस्य, रूपस्येव यौवनम् , यौवनस्येव मकरकेतनम् , मकरकेतनस्येव वसन्तसमयम् , वसन्तसमयस्येव दक्षिणानिलम् , अनुरूपं सखायं मुनिकुमारकं कपिञ्जलनामानं जराधवलितस्य कञ्चुकिनोऽनुमार्गेण चन्द्रातपस्येव बालातपमनुयायिनम् अपश्यम् । अन्तिकमुपागतस्य चास्य पर्याकुलमिव सविषादमिव शून्यमिव अर्थिनमिव अन्तर्गताकूतम् आकारमलक्षयम् । उत्थाय च कृतप्रणामा सादरं स्वयमासनमुपाहरम् । उपविष्टस्य च बलादनिच्छतोऽपि प्रक्षाल्य चरणावुपमृज्य चौत्तरीयांशुकपल्लवेनाव्यवधानायां भूमावेव तस्यान्तिके समुपाविशम् । अथ मुहूर्तमिव स्थित्वा किमपि विवक्षुरिव स तस्यां समीपोपविष्टायां तरलिकायां चक्षुरपातयत् । अहन्तु विदिताभिप्रायादृष्ट्यैव "भगवन् ! अव्यतिरिक्तेयमस्मच्छरीरात् । अशङ्कितमभिधीयताम्" इत्यवोचम् ।

**प्रश्नः – ४ अधोलिखितयो: कञ्चिदेकं प्रश्नं विशदयत ।** **१०**

**(१) पुण्डरीकाय कपिञ्जलोपदेशं यथाग्रन्थं निरूपयत ।**

**(२) कपिञ्जलस्यागमनविषये सरलसुरगिरा वर्णनं कुरुत ।**

## तृतीयान्विति:(Unit - 3)

**प्रश्नः – ५ कौचिद् द्वौ प्रश्नौ वर्ण्यौ ।** **१०**

१) प्रत्युषसि तूत्थाय तस्मिन्नेव सरसि स्नात्वा कृतनिश्चया, तत्प्रीत्या तमेव कमण्डलुमादाय तान्येव च वल्कलानि तामेवाक्षमालां गृहीत्वा, बुद्ध्वा निसारतां संसारस्य, ज्ञात्वा च मन्दपुण्यतामात्मन:, निरूप्य चाप्रतीकारदारुणतां व्यसनोपनिपातानाम् , आकलय्य दुर्निवारतां शोकस्य, दृष्ट्वा च निष्ठुरतां दैवस्य, चिन्तयित्वा चातिबहुलदु:खतां स्नेहस्य, भावयित्वा चानित्यतां सर्वभावानाम्, अवधार्य चाकाण्डभङ्गुरतां सर्वसुखानाम् , अविगणय्य तातमम्बाञ्च, परित्यज्य सह परिजनेन सकलबन्धुवर्गम् , निवर्त्य विषयसुखेभ्यो मन: संयम्येन्द्रियाणि गृहीतब्रह्मचर्या देवं त्रैलोक्यनाथमनाथशरणम् इमं शरणार्थिनी स्थाणुमाश्रिता ।

२) गते च ताते तत: प्रभृति तस्य जनस्याश्रुमोक्षमात्रेण कृतज्ञतां दर्शयन्ती तदनुरागकृश-मिदमपुण्यबहुलमस्तमितलज्जममङ्गलभूतमनेकक्लेशायासहस्रनिवासं दग्धशरीरकं

बहुविधैर्नियमशतैः शोषयन्ती, वन्यैश्च फलमूलवारिभिर्वर्तमाना, जपव्याजेन तद्गुणगणानिव गणयन्ती, त्रिसन्ध्यमत्र सरसि स्नानमुपस्पृशन्ती, प्रतिदिनमर्चयन्ती देवं त्र्यम्बकम् , अस्यामेव गुहायां तरलिकयां सह दीर्घं शोकमनुभवन्त्यवसम् ।

३) "अचिन्त्यो हि महात्मनां प्रभावः" इत्येनां सूक्तिं वर्णयत।

**प्रश्नः – ६ अधोदत्तयोः प्रश्नयोः कश्चिदेकः प्रश्नः विस्तार्यः।** **१०**

**१) महाश्वेतायै चन्द्रापीडस्य सान्त्वनं प्रकटयत।**

**२) महाश्वेतावृत्तान्तोपसंहारं वर्णयत**

## अन्वितयः १ – ३ (Unit 1 – 3)

**प्रश्नः – ७ प्रदत्तेषु लघूत्तरीयप्रश्नेषु केचन दश प्रश्नाः संसाध्याः।** **१०**

१) कादम्बर्याः रचयिता कः ?

२) ग्रन्थकर्तुः काः रचनाः सन्ति ?

३) महाश्वेतावर्णनं कः करोति ?

४) चन्द्रापीडस्यातिथ्यं केन कृतम्?

५) अप्सरसां कति कुलानि?

६) गन्धर्वशतसहस्राणि कुत्र वसन्ति ?

७) चित्ररथेन निर्मितस्य तडागस्य नाम किम् ?

८) भृङगिरिटी इति किम् ?

९) कस्य वृक्षस्य मञ्जरी श्रवणसंसर्गमासादितवती ?

१०) यदा पुण्डरीकः स्नानार्थमागतः तदा का तिथिः आसीत् ?

११) वनदेवता कस्य वनस्य अधिष्ठात्री वर्तते ?

१२) पुण्डरीकानुगामिनः मुनिकुमारकस्य नाम किम्?

१३) गौरी-हंसयोः अपत्यं नाम किम्?

१४) महाश्वेतया सह अच्छोदसरसि स्नातुं का गताऽऽसीत्?

१५) "प्राणपरित्यागेनापि रक्षणीयाः सुहृदसवः" इत्येनां सूक्तिं कः कथयति ?

*****************